अध्यायः ६

# भारतीयसभ्यतायाः आरम्भः

> भारतस्य प्राचीनतमसभ्यता, या हरप्पा-सभ्यता, सिन्धु-सभ्यता सिन्धु-सरस्वती-सभ्यता इति विविधनाम्ना प्रसिद्धा आसीत्, सा खलु बहुधा विशिष्टा आसीत्। [एषा सभ्यता दर्शितवती यत्] कथं सुसन्तुलितः समुदायः जीवति - यस्मिन् धनि-दरिद्रयोर्मध्ये भेदाः न दृश्यन्ते ... सारतया हरप्पासभ्यतायाः सामाजिक-परिदृश्यं 'शोषणस्य' न, अपितु 'पारस्परिकसहावस्थानस्य' चित्रं दर्शयति।
>
> - बी. बी. लालः

## महत्त्वपूर्णाः प्रश्नाः ?

१. का नाम सभ्यता?

२. भारतीयोपमहाद्वीपस्य प्राचीनतमसभ्यता का आसीत् ?

३. तस्य प्रमुखाः उपलब्धयः काः आसन् ?

0681CH06

© NCERT not to be republished



चित्रम् ६.१. 'धोलावीर-दुर्ग'-क्षेत्रस्य उत्तरदिशस्थं प्रवेशद्वारम्।

## का नाम सभ्यता ?

**धातुविज्ञानम् :** प्रकृत्याः धातुनिष्कासनस्य, शुद्धीकरणस्य संयोजनस्य वा वैज्ञानिकप्रक्रिया अत्र अन्तर्भवति। तथैव अत्र वैज्ञानिकपद्धत्या धातूनां, तेषां गुणानां च अध्ययनं क्रियते।

चतुर्थाध्यायस्य अन्ते वयं प्रथमं मानवसमूहं दृष्टवन्तः, ये गोष्ठीरूपेण निवसन्ति, कृषिं कुर्वन्ति, प्रयुक्तेः विकासं कृत्वा 'सभ्यतायाः' मार्गे अग्रे गच्छन्ति। (यथा निर्माणं, **धातुविज्ञानं** , परिवहनं)।

तर्हि का नाम सभ्यता ? सामान्यतया, मानवसमाजस्य उन्नतपर्यायस्य कृते एतत् पदम् उपयुज्यते। यथार्थरूपेण वदामश्चेत्, वयं अत्र विचारं करिष्यामः यत् 'सभ्यतायाः' न्यूनातिन्यूनं निम्नलिखिताः विशेषताः भवेयुः इति :

- **सर्वकारस्य प्रशासनस्य च कानिचन रूपाणि** — एतादृशः समाजः अनेकेषां जटिलानाम्, अनेकेषां कार्याणां च प्रबन्धनम्।
- **नागरिकता** — नगरनिर्माणं, नगराणां विकासः, तेषां प्रबन्धनं च, यस्मिन् सामान्यतया जल-प्रबन्धनम्, जलनिर्गमन-व्यवस्था च अन्तर्भवतः।
- **विविध-शिल्प-द्रव्याणि** - प्राकृतिकसम्पदानां (यथा, शिलायाः धातोः वा) प्रबन्धनम्, उपयोगार्थं वस्तूनां निर्माणं (यथा आभूषणानि उपकरणानि च)।
- **आभ्यन्तर-वाणिज्यं** (नगरान्तर्गतं वा प्रदेशान्तर्गतं वा) **बहिर्वाणिज्यं** (दूरस्थप्रदेशैः सह वा पृथिव्याः अन्यान्यभागैः सह वा) च —- सर्वप्रकाराणां वस्तूनां विनिमयार्थम्।
- **लेखनस्य केचन प्रकाराः** — अभिलेखान् रक्षयितुं संवादं च कर्तुम् आवश्यकम्।
- **सांस्कृतिकविचारः** —- कला, वास्तुकला, साहित्यं, मौखिकपरम्परा, सामाजिक-रीतयः इत्यादीनां माध्यमेन जीवनस्य विश्वस्य च विविधायामानाम् अभिव्यक्तिः।
- **कृषिजोत्पादनम्** — न केवलं ग्रामाणाम्, अपि तु नगराणां पोषणार्थं पर्याप्तं भवेत्।

### विषयेऽस्मिन् चिन्तयन्तु

उपर्युक्तेषु लक्षणेषु किं सर्वाधिकं मूलभूतम् अस्ति इति भवन्तः मन्यन्ते - अर्थात् अन्येषां वैशिष्ट्यानां विकासाय अत्यावश्यकं लक्षणम्?

© NCERT not to be republished

## एहि, वयम् अन्विषामः


उपर्युक्तसूच्यां प्रत्येकस्य लक्षणस्य कृते, एतादृशसमाजे विद्यमानानां व्यवसायानां वृत्तीनां वा सूचीं निर्मातुं शक्यते वा?



अद्यत्वे विश्वस्य अधिकांशेषु समाजेषु एतानि सर्वाणि लक्षणानि विद्यमानानि सन्ति इति सुलभतया दृश्यते। परन्तु यथा वयम् अधुना परिभाषितवन्तः, तद्दृष्ट्या सभ्यता कदा आरब्धा?

विश्वस्य विभिन्नेषु भागेषु भिन्नभिन्नसमये सभ्यतायाः आरम्भः अभवत्। मेसोपोटामिया (आधुनिक इराक तथा सीरिया) इति नाम्ना प्रसिद्धे स्थाने, प्रायः षट्सहस्रवर्षपूर्वं सभ्यतायाः सूचना अभवत् एवञ्च प्राचीनमिस्रदेशे तस्य कतिपयशताब्द्यनन्तरं एतद् घटितम्। भवन्तः परवर्तिकक्षायाम् एतेषां विषये तथा अन्यासां सभ्यतानां विषये च ज्ञास्यन्ति । विविधक्षेत्रे, तासां प्राचीनसभ्यतानां महद्योगदानं प्रगतिं च विना मानवजातिः तस्य वर्तमानस्थितिं प्राप्तुं न शक्नुयात्।

इदानीं वयं केवलं भारतीय-उपमहाद्वीपं पश्यामः, विषिष्य तस्य उत्तर-पश्चिम-क्षेत्रं, यत्र अस्माकं कथा आरभ्यते।




चित्रम् ६.२. प्रायः षड्विंशतिशततमात् (२६००) ख्रीष्टपूर्वात् वर्षात् आरभ्य ऊनविंशतिशततमं (१९००) ख्रीष्टपूर्वाब्दं यावत्, सिन्धु-सरस्वती-सभ्यतायाः कालखण्डं दर्शयन्ती समयरेखा।

© NCERT not to be republished


COLOUR ISSUE

## ग्रामात् नगरं प्रति

**उपनदी :** या नदी तस्याः अपेक्षया बृहत्तरनद्या सह (सरोवरेन सह वा) मिलति। यथा, यमुना गङ्गायाः उपनदी अस्ति।

पञ्जाबप्रदेशस्य (अद्य भारतपाकिस्तानयोः मध्ये विभक्तः) सिन्ध-प्रदेशस्य (अधुना पाकिस्ताने) च विशालः समतलभूमिः सिन्धुनद्या, तस्य उपनदीभिश्च जलसमृद्धा अस्ति। एतेन ते समतलप्रदेशाः उर्वराः जाताः तथा कृषिकार्यार्थं अनुकूलाश्चाभवन्। अस्याः पूर्वदिशि, कतिपयसहस्रवर्षेभ्यः पूर्वं, सरस्वती इति अपरा नदी हिमालयस्य पादतः हरियाणा, पञ्जाबः, राजस्थानं, गुजरातः इति केषुचित् भागेषु प्रवहति स्म (६.३ इति चित्रं पश्यन्तु।)। अस्मिन् सम्पूर्णे प्रदेशे, प्रायः ३५०० ईसा.पूर्वतः ग्रामाः नगरेषु रूपान्तरिताः जाताः। अपि च वर्धमानेन वाणिज्येन तथा अन्यैः विनिमयैश्च, तानि नगराणि वर्धितानि क्रमशः महानगरेषु रूपान्तरितानि अभवन्। प्रायः २६०० ईसा.पूर्वः इति समयाभ्यन्तरे इदं परिवर्तनम् अभवत्।

पुरातत्त्वशास्त्रज्ञाः एतस्याः सभ्यतायाः कृते अनेकानि नामानि दत्तवन्तः - 'सिन्धुसभ्यता', 'हरप्पासभ्यता', 'सिन्धु-सरस्वती-सभ्यता' अथवा 'सिन्धु-सरस्वती-प्रदेशस्य' सभ्यता इत्यादि। वयं एतानि सर्वाणि नामानि उपयोक्तुं शक्नुमः। अस्मिन् स्थाने ये जनाः निवसन्ति स्म, ते 'हरप्पा-जनाः' इति नाम्ना अभिधीयन्ते। विश्वस्य प्राचीनतमसभ्यतासु इयम् अन्यतमा अस्ति।







### मा विस्मरन्तु

सिन्दु-स्वरस्वती-सभ्यतायाः जनाः अद्य 'हरप्पा-जनाः' इति नाम्ना किमर्थम् अभिधीयन्ते? अस्य एतत् कारणम् अस्ति यत् हरप्पा इति नगरम् (अद्य पाकिस्तानस्य पञ्जाब्-प्रदेशे) अस्याः नागरिकसभ्यतायाः प्रथमं निदर्शनम् आसीत् यस्य उत्खननं, १९२०-२१ तमे वर्षे, प्रायः एकशताब्दीपूर्वम् अभवत्।

अयं विकासः 'भारतस्य प्रथमं नगरीकरणम् इत्यपि कथ्यते।

© NCERT not to be republished




चित्रम् ६.३. सिन्धु-सरस्वती-सभ्यतायाः केषाञ्चन मुख्यस्थानानां मानचित्रम्।
पर्वतश्रेणीभिः (गोधूमवर्णेन) निर्मिताः प्राकृतिकसीमाः अवलोकयन्तु।

## एहि, वयम् अन्विषामः



अस्याः सभ्यतायाः कानिचन महत्त्वपूर्णनगराणि मानचित्रे चिह्नितानि सन्ति (चित्रम् ६.३) वर्ग-क्रियारूपेण, अग्रिमपृष्ठे पट्टिकायां विद्यमानैः आधुनिकराज्यैः अथवा प्रदेशैः सह एतानि नगराणि मेलयितुं शक्यते वा?

| हरप्पानगरम् | अद्यतनीयं राज्यं क्षेत्रं वा |
|---|---|
| धोलावीरा | पञ्जाबः |
| हरप्पा | गुजरातः |
| कलिबङ्गान् | सिन्धः |
| मोहेञ्जो-दारो | हरियाणा |
| राखीगढ़ी | राजस्थानम् |

### सरस्वती नदी

पूर्वपृष्ठे यद् मानचित्रं दत्तमस्ति, (ऊननवतितमे (८९) पत्रे दत्तं ६.3 तमं चित्रम्) तत्र सिन्धुनदस्य (अथवा सिन्धुनद्याः) पञ्च प्रधानाः उपनद्यः दर्शिताः सन्ति। तासां नदीनां पार्श्वे महेञ्जोदारो, हरप्पा इत्यादीनि महत्त्वपूर्णानि नगराणि वर्धितानि अभवन्। परन्तु सरस्वत्याः पार्श्वे तादृशानि अनेकानि स्थलानि सन्ति, यानि अद्यत्वे भारते 'घग्गर्' तथा पाकिस्तानदेशे 'हक्रा' इति नाम्ना प्रसिद्धानि सन्ति (अतः 'घग्गर्-हक्रा-नदी' इति नाम अपि अस्ति।)। एषा नदी अधुना ऋतुकालिका अस्ति, यतः केवलं वर्षाकाले एव प्रवहति। सरस्वतीनद्याः प्रथमोल्लेखः ऋग्वेदस्य सूक्तेषु प्राप्यते। अस्य विषये वयं सप्तमाध्याये पठिष्यामः। अस्मिन् ग्रन्थे सरस्वती देवीरूपेण, 'पर्वतात् समुद्रं प्रति' प्रवहन्ती नदीरूपेण च पूज्यते। पश्चाद् ग्रन्थेषु, इयं नदी शुष्का सती अन्ते लुप्तवती इति वर्णितम् अस्ति।

## नगरस्य संरचना

हरप्पा, महेञ्जोदारो चेति नगरद्वयम् अधुना पाकिस्तानदेशे स्तः। हरप्पासभ्यतायाः निदर्शनत्वेन एतन्नगरद्वयं प्रथमम् आविष्कृतमभवत्। प्रायः एकशताब्दीपूर्वं १९२४ तमे वर्षे अस्य विषये वयं ज्ञातवन्तः। एतेषु अनेकानि नगराणि सिन्धुनद्याः उपत्यकायाम् आसन्, अतः प्रारम्भे इयं सभ्यता 'सिन्धु-उपत्यका-सभ्यता' इति उच्यते स्म। पश्चात्, अन्यानि प्रमुखानि नगराणि, यथा धोलावीरः (गुजरातस्य) राखीगढी (हरियाणा-राज्यस्य) गणवेरीवाला (पाकिस्तानस्य चोलिस्तान्-मरुभूमौ) तथा च शतशः लघुप्रदेशानि (गुजरातस्य लोथल् इत्यादीनि) आविष्कृतानि अभवन्। तेषु केषुचित्स्थलेषु उत्खननं जातम्।

© NCERT not to be republished

## विषयेऽस्मिन् चिन्तयन्तु

भवन्तः 'सिन्धु-उपत्यका-सभ्यता' इति नाम इदानीं प्राप्तवन्तः। किन्तु भवद्भिः दृष्टं स्यात् यद् अस्माभिः अस्य शब्दस्य प्रयोगः न कृतः। मानचित्रं ध्यानेन पश्यन्ति चेद् (ऊननवतितमे (८९) पत्रे प्रदत्तं ६.३ तमं चित्रम्) "भ्यालि" अर्थात् "उपत्यका" इति शब्दस्य किमर्थं प्रयोगं न कृतवन्तः इति भवन्तः अवगन्तुं शक्नुवन्ति। अत्र कारणमस्ति यद् अधुना वयं जानीमः, इयं सभ्यता सिन्धु-प्रदेशात् परं बहुदूरं विस्तृता आसीत्।

एतादृशाः आविष्काराः अद्यपि प्रचलन्ति! अत्र इदं लक्षणीयं यत् सरस्वती-तटप्रदेशे न केवलं राखीगढी , गणवेरीवाला इति महानगरद्वयमस्ति, अपि तु अनेकानि नगराणि तथा (हरियाणा-राज्यस्य फर्माना, राजस्थान-राज्यस्य कालीबङ्गन्), कतिपयक्षुद्रजनपदानि अपि (हरियाणा-राज्यस्य भिराना तथा बनवाली) च सन्ति। वस्तुतः इदं मानचित्रं (८9 तमे पृष्ठे ६.३ इति चित्रम्) तस्मिन् प्रदेशे स्थानानाम् उच्चघनत्वं सूचयति।

बृहत्तरानि हरप्पा-नगराणि सम्यक् परिकल्प्य निर्मितानि आसन्। तेषां वीथयः विस्तृताः (९२ तमे पृष्ठे ६.४ तथा ६.५ इति चित्रे) तथा मुख्यदिशं प्रति उन्मुक्ता आसन्। अधिकांशनगराणि **दुर्गैः** परिवेष्टितानि इव दृश्यन्ते। तेषां द्वौ पृथग् भागौ आस्ताम् इति अनुमीयते - 'उच्चनगरं', यत्र स्थानीयः **अभिजातवर्गः** निवसति स्म, तथा 'निम्ननगरं', यत्र सामान्यजनाः निवसन्ति स्म।

**दुर्गः :** सामान्यतया रक्षात्मकप्रयोजनार्थं निर्मितं निवासस्थानं नगरं वा यं परितः विशालः प्राचीरः अस्ति।

**अभिजातवर्गः -** अत्र अयं शब्दः प्रायः समाजस्य उच्चस्तरीयवर्गान् निर्दिशति। यथा शासकाः, अधिकारिणः, प्रशासकाः, पुरोहिताः चेत्यादयः।

केचन बृहद्भवनानि सामूहिकप्रयोजनार्थं उपयुज्यन्ते इति प्रतीयते। यथा, भाण्डारगृहं, यत्र परिवहनार्थं वस्तूनि सञ्चितानि अभवन्। विभिन्नाकाराणां व्यक्तिगतगृहाणि वीथिषु, लघुपथेषु च पङ्क्तिबद्धानि आसन्। तत्र लघूनां बृहतां च गृहाणां निर्माणस्य गुणवत्ता समानम् आसीत् इति अधुना चमत्कारं जनयति। एतानि सर्वाणि भवनानि सामान्यतया इष्टकाभिः निर्मितानि आसन्।

केषाञ्चन संरचनानाम् उद्देश्यम् अधुनापि विवादविषयः अस्ति। इदं महेञ्जोदारो-नगरस्य प्रसिद्धस्य बृहत्-स्नानागारस्य ('ग्रेट् बाथ्') चित्रम् अस्ति (९३ तमे पृष्ठे ६.६ इति चित्रम्)। एकः लघुः परन्तु विस्तृतः जलाधारः यः प्रायः १२ x ७ मीटर्-परिमितः आसीत् तथा यत्र उपरिभागे स्थापितानाम् इष्टकानामुपरि सावधानेन जलरोधकसामग्रीणां (यथा प्राकृतिक-शिलाजतु, तारः इत्यस्य प्रकारः) प्रलेपः कृतः। जलाधारः लघुकक्षैः परिवेष्टितः आसीत्,



© NCERT not to be republished



(उपरि) चित्रम् ६.४.
कालीबङ्गानः (राजस्थानम्) इत्यत्र, निम्ननगरक्षेत्रे एका विस्तृता वीथिः।



(दक्षिणभागे) चित्रम् ६.५.
धौलवीरे मध्यनगरक्षेत्रे आवासस्थानम्, लम्बवीथिभिः सह, (धौलवीर इति स्थाने त्रीणि विशिष्टानि क्षेत्राणि आसन्, अन्यनगरेषु केवलं द्वौ भागौ आस्ताम्)। अपि च अस्मिन् नगरे अधिकांशानां भवनानाम् आधारस्तम्भाः पाषाणनिर्मिताः आसन्।

© NCERT not to be republished

येषु प्रत्येकस्मिन् कक्षे एकः कूपः आसीत्; जलाधारस्य एकस्मिन् कोणे जलनिर्गमस्थानमासीत्, येन समये समये जलाधारं रिक्तं कृत्वा स्वच्छजलेन पुनः पूरयितुं शक्यते।



चित्रम् ६.६. मोहेञ्जोदारो-नगरस्थं बृहत् स्नानागारः

एतादृशायाः संरचनायाः उद्देश्यं किमासीत्? पुरातत्त्वशास्त्रज्ञाः अनेकानि सम्भाव्यानि व्याख्यानि प्रस्तावितवन्तः। यथा, जनानां कृते सार्वजनिकस्नानागारं, केवलं राजपरिवारस्य कृते स्नानगृहम्, अथवा धार्मिकविधीनां कृते व्यवहृतः जलाशयः। प्रथमं व्याख्यानम् अधुना निराकृतम् अस्ति यतः अस्मिन् नगरे अधिकांशगृहेषु व्यक्तिगतस्नानगृहाणि आसन् इति अधुना ज्ञायते।

## एहि, वयम् अन्विषामः

अन्तिमयोः व्याख्यानयोः विषये वर्गे वादमुखेन चर्चां कुर्वन्तु। अन्यत् किमपि व्याख्यानं कल्पयितुं शक्यते वा? स्मर्यतां यत् अस्मिन् सन्दर्भे, अस्माकं समीपे इतिहासस्य अन्यत् किमपि स्रोतः नास्ति - कोऽपि शिलालेखः वा ग्रन्थः वा, पर्यटकस्य विवरणं वा नास्ति।



© NCERT not to be republished

## जलप्रबन्धनम्

हड़प्पा-जनाः जलप्रबन्धनाय स्वच्छतायै च बहु महत्त्वं दत्तवन्तः। प्रायः तेषां गृहेषु स्नानार्थं पृथक् स्थानमासीत्। एतानि स्नानगृहाणि बृहत्तर-जलनिर्गम-जालेन सह सम्बद्धानि आसन् (चित्रम् ६.७) यः सामान्यतया वीथ्याः अधः प्रवाहितः अपशिष्टजलं निर्गमयति।



चित्रम् ६.७. लोथल-(गुजरातः)-स्थानीया जलनिर्गमप्रणाली।

महेञ्जोदारो-नगरे जनाः इष्टिकाभिः निर्मितेभ्यः शतशः कूपेभ्यः जलं आनयन्ति स्म।

परन्तु अन्येषु नगरेषु प्रायः तडागेभ्यः, समीपस्थधाराभ्यः, मानवनिर्मितेभ्यः **जलाशयेभ्यः** वा जलम् आनीयते स्म। धोलावीरः इत्यत्र (गुजरातस्य कच्छक्षेत्रे) बृहत्तमः जलाशयः ७३ मीटर्-दीर्घः आसीत् !

**जलाशयः** - विशालं प्राकृतिकस्थानं कृत्रिमस्थानं वा यत्र जलस्य संग्रहणं भवति।

## एहि, वयम् अन्विषामः



वर्गक्रियारूपेण, कमपि मापकरज्जुं स्वीकृत्य भवतः/भवत्याः कक्षायाः, विद्यालयमार्गस्य, क्रीडाङ्गणस्य वा दैर्घ्यं मापयन्तु। एतेषां दैर्घ्येन सह धोलावीर-नगरस्थ-बृहत्तम-जलाशयस्य दीर्घतायाः तुलनां कुर्वन्तु।

धोलावीर-नगरे, न्यूनातिन्यूनं षड् पाषाणनिर्मिताः पाषाणेषु खोदिताः वा बृहज्जलाशयाः सन्ति (चित्रम् (६.८)। तेषु बहवः कुशलजलसङ्ग्रहणस्य वण्टनस्य च कृते भूगर्भजलनिर्गमद्वारा योजिताः आसन्।



धोलावीर इत्यत्र शिलायां खोदितः एकः विशालः जलाशयः, यः ३३ मीटर्-दीर्घः अस्ति।

## विषयेऽस्मिन् चिन्तयन्तु

एतादृशं जलाशयजालं निर्मातुं कियन्तः कर्मकराः आवश्यकाः इति कल्पयन्तु। तेषां कार्याणि कः व्यवस्थितवान्, कश्च निर्देशान् दत्तवान् इति चिन्तयन्ति वा? अस्य श्रमस्य कृते किं ते वेतनं प्राप्तवन्तः, कथं वा प्राप्तवन्तः इति? (सङ्केतः - अद्य यथा अस्ति तस्मिन् काले धनस्य तादृशं स्वरूपं मूल्यं वा नासीत्।) यदा-कदा जलाशयानां शुद्धिकरणं आवश्यकम् चेत्, तेषां निर्वहणार्थं केचन स्थानीयाधिकारिणः आसन् वा? एतेभ्यः सर्वेभ्यः अस्य नगरस्य शासकस्य नगरपालिका-प्रशासनस्य च विषये वयं किं सङ्केतं प्राप्स्यामः?

स्वस्य कल्पनाशक्तिम् उपयुज्य शिक्षकेन सह चर्चां कुर्वन्तु। पुरातत्त्वविदः अपि एतेषां प्रश्नानां विषये चर्चां कुर्वन्ति, तथा च उत्तराणि अपि सर्वदा निश्चितानि न सन्ति!

## हरप्पा-जनाः किं खादन्ति स्म ?

दालः - सस्यानाम् एकः प्रकारः यस्मिन् राजमाषः, कलायः, द्विदलम् (दालः) इत्यादीनि सन्ति।

हरप्पा-जनाः बृहल्लघुनद्योः तटे स्वस्य अनेकानि निवासस्थानानि निर्मितवन्तः। न केवलं जलस्य सुलभतायाः कारणाद् अपितु कृषिकार्यार्थं च। अयं तार्किकः विकल्पः अस्ति, यतः नदीतटस्य मृत्तिका उर्वरा भवति। पुरातात्त्विकनिष्कर्षैः ज्ञायते यत् हरप्पा-जनाः यवः, गोधूमः, केचन तृणधान्यानि, कदाचित् तण्डुलानि, द्विदलानि, विविधानि शाकानि इत्यादीनाम् उत्पादनं कुर्वन्तः आसन्। ते यूरेशिया-देशे आदौ कार्पासस्य उत्पादनम् अपि अकुर्वन्, यत् वस्त्रनिर्माणार्थम् उपयुज्यते स्म। ते कृषि-उपकरणानि निर्मितवन्तः, येषु हलः अपि अन्तर्भवति (चित्रम् ६.९)। एतेषु उपकरणेषु कानिचन आधुनिकसमये अपि कृषकैः उपयुज्यन्ते।



चित्रम् ६.९ । हलस्य लघुमृत्तिकाप्रतिरूपम्
(हरियाणायां बाणावलीतः)

एतद् उन्नतकृषिकार्यं शतशः लघुग्रामीणस्थलैः ग्रामैः वा व्यवस्थापितम् आसीत्। तदापि नगराणि, अधुना इव, ग्रामाञ्चलात् प्रतिदिनं पर्याप्तं कृषिजोत्पादान् प्राप्नुवन्ति स्म इत्यतः जीवन्ति। हरप्पा-जनाः मांसाहारार्थम् पशुपालनं कुर्वन्ति स्म तथा नदीषु समुद्रे च मत्स्याहरणमपि कुर्वन्ति स्म। उत्खननकाले प्राप्तैः पशूनां मत्स्यानां च अस्थिभिः एतत् ज्ञातम् अस्ति। हरप्पा-जनानां पाकपात्रेषु किम् आसीत् ? मृण्मयपात्राणां वैज्ञानिकपरीक्षणेन अस्य विषये कानिचन उत्तरानि प्राप्तानि। सम्भावितेषु (दुग्धजातपदार्थाः) एवञ्च आश्चर्यकारकेषु हरिद्राः, आर्द्रकम्, कदलीफलानां च अवशेषाः। स्पष्टमस्ति यत्, तेषां आहारः अतीव वैविध्यपूर्णः आसीत्!

### एहि, वयम् अन्विषामः

कल्पयतु यत् भवान्/भवती एकस्मिन् हरप्पा-गृहे भोजनं पचति इति। उपरि दत्तांशस्य आधारेण भवान्/भवती किं भोजनं व्यञ्जनं वा निर्मातुं शक्नोति?




## विस्तृतं वाणिज्यम्

हड़प्पा-जनाः न केवलं स्वप्रदेशानाम् अन्तः (अन्यानि समीपस्थानि दूरस्थानि वा नगराणि) अपितु भारतस्य अन्तः बहिः च अन्यसभ्यताभिः संस्कृतिभिः च सह सक्रियव्यापारं कुर्वन्तः आसन्। ते आभूषणानां, काष्ठानां, नित्यप्रयोगस्य विविधवस्तूनां च निर्यातं कुर्वन्ति स्म (९८ तमे पृष्ठे ६.११ इति चित्रम्)। अनेन सह प्रायः सुवर्णस्य कार्पासस्य, केषाञ्चन खाद्यपदार्थानामपि निर्यातः अभवत्। कार्नेलियन-विडस् इत्यस्मात् निर्मितानि अलङ्काराणि तेषां बहु प्रियम् आसीत् (९८ तमे पृष्ठे ६.११ इति चित्रम्)। कार्नेलियन-विडस् इति एकः रक्तवर्णीयः उपरत्नः अस्ति, यत् गुजरातराज्ये अधिकतया प्राप्यते। हरप्पा-शिल्पिनः तान् अलङ्कर्तुं विशेषकौशलानि विकसितवन्तः, येन एकः तारः तेषां मध्ये गन्तुं शक्नोति, तथा च तस्य माध्यमेन विविधरीत्या तान् अलङ्कर्तुं शक्यते। ते शङ्खम् उपयुज्य तेन सुन्दराणि कङ्कणानि अपि निर्मितवन्तः तेषु अलङ्करणमपि कृतवन्तः। अस्य कृते अत्याधुनिककौशलस्य आवश्यकता अस्ति, यतः शङ्खम् इतीदं कठिनं द्रव्यम् अस्ति।

निर्यातवस्तूनां विनिमयरूपेण हरप्पा-जनाः किं आयातं कृतवन्तः इति विषये स्पष्टधारणा नास्ति। परन्तु तस्मिन् प्रायः ताम्रमपि अन्तर्भवति स्म यतः गृहे अयं धातुः सामान्यः नासीत्।

© NCERT not to be republished

## मा विस्मरन्तु

हरप्पा-जनाः मृदु-धातोः व्यवहारे यथा ताम्र-शिल्पकलायां निपुणाः आसन्। यदि ताम्रेन सह टिन् इति योजितं भवति तर्हि सः धातुः कांस्यरूपेण परिणमते। सः ताम्रस्य अपेक्षया कठिनतरः भवति। हरप्पा-जनाः यन्त्राणि, घटानि, पात्राणि च निर्मातुं कांस्यस्य उपयोगं कुर्वन्ति स्म। परवर्तिसमये काश्चन कांस्यप्रतिमाः अपि वयं द्रष्टुं शक्नुमः।



चित्रम् ६.१०. सुसा (अधुना इरान्-देशस्य अन्तर्गतम्) इत्यत्र उत्खननात् प्राप्ताः कार्नेलियन-विडस् इत्यनेन निर्मिताः हाराः।



चित्रम् ६.११. ओमानस्य तटे प्राप्तं हड़प्पासभ्यतायाः निदर्शनम्, हस्तिदन्तनिर्मिता कङ्कतिका (प्रायः ७ से.मी.दैर्घ्यविशिष्टा)

एतादृशं व्यापारं कर्तुं ते स्थलभागानां नदीनां च उपयोगं कुर्वन्ति स्म तथा अधिकदूरस्थानां स्थानानां कृते सागरपथः उपयोगं कुर्वन्ति स्म। सम्भवतः इदं भारतस्य आदिमस्य सामुद्रिकक्रियाकलापस्य उदाहरणम् अस्ति। गुजरातस्य सिन्ध-प्रदेशस्य च तटीयक्षेत्रेषु कतिपयानि हरप्पा-नगराणि प्राप्तानि सन्ति। गुजरातराज्यस्य लोथल् इत्यत्र प्राप्तस्य नौनिर्माणस्थानस्य दैर्घ्यं सप्तदशोत्तर-द्विशत-(२१७)-मीटर् इति, प्रस्थं च षट्त्रिंशत्-(३६)-मीटर् इति अस्ति। एतद् विस्मयं जनयति यत् एतत् केवलं द्वयोः फुटबॉल-क्रीडाङ्गणयोः अपेक्षया किञ्चित् बृहद् अस्ति! अस्मिन् अवश्यमेव नौस्थानमासीत् अर्थात् पण्यवाहिनौयानानि प्राप्तुं प्रेषयितुं च किमपि विशिष्टं स्थानमासीत्।

एतादृशस्य विस्तृतस्य व्यापारस्य विषये तादृशानां अभिज्ञानां व्यापारिणाम् आवश्यकता भवति, येषाम् उपयुक्तवस्तूनां ज्ञानमस्ति। अपि च ते परस्परमपि जानीयुः ! अस्य व्यापारस्य कृते एव सहस्रशः लघुमुद्राणाम् उपयोगः क्रियते इति भासते। हरप्पासभ्यतायाः



चित्रम् ६.१२ । लोथाल्-परिसरस्थं विशालं नौस्थानम्

अनेकनगरेभ्यः उत्खननात् एतादृशलघुमुद्राः प्राप्ताः। एताः मुद्राः सामान्यतया स्टेटाइट इति खनिजेन निर्मिताः आसन्। स्टेटाइट इति एका मृदुशिला अस्ति, यत् तापेन कठोरतां प्राप्नोति। एताः लघुमुद्राः केवलं कतिपयसेण्टिमीटर्-परिमिताः एव भवन्ति तथा सामान्यतया तासाम् उपरि लिपिसदृशानां चिह्नसहितानाञ्च पशूनाम् आकृतयः चित्रिताः सन्ति। परन्तु इदं पशुचित्रं प्रतीकात्मकम् अथवा तस्य कोऽपि विशेषः अर्थः अस्ति इति अद्यापि न ज्ञायते। तथापि इदं निश्चयेन सह वक्तुं शक्यते यत् वाणिज्यिक-क्रियाकलापैः सह एतेषां सम्बन्धः अस्ति।



चित्रम् ६.१३-१, ६.१३-२, ६.१३-३ । (वामतः दक्षिणं प्रति) एकशृङ्गं दर्शयन्ती हरप्पा-मुद्रा; वृषभं दर्शयन्ती हड़प्पा-मुद्रा; शृङ्गव्याघ्रं दर्शयन्ती हरप्पा-मुद्रा

## एहि, वयम् अन्विषामः

कैश्चित् लेखनैः सह एताः तिस्रः हरप्पा-मुद्राः दृष्ट्वा भवतां मनसि कः विचारः आगच्छति? किं भवन्तः अस्य कृते किमपि व्याख्यां सूचयितुम् इच्छन्ति ? स्वस्य कल्पनाशक्तेः उपयोगं कुर्वन्तु !



© NCERT not to be republished

# प्राचीनानां जीवनम्

## पुरातत्त्वविदः हरप्पाजनानां निर्मितानि अनेकानि वस्तूनि उत्खननात् प्राप्तवन्तः ।

### नित्यप्रयोजनस्य वस्तूनि





चित्रम् ६.१४-१ (उपरि), ६.१४-२ (दक्षिणभागे) । कांस्यदर्पणम्; एकं मृत्पात्रम् (उभौ अपि धोलवीरतः प्राप्तौ स्तः ।)





चित्रम् ६.१४-३ (उपरि), ६.१४-४ (दक्षिणभागे) । कतिपय-शिलाभाराः; कांस्यनिर्मित-छेनी (उभौ अपि धोलवीरतः प्राप्तौ स्तः ।)





चित्रम् ६.१४-५, ६.१४-६ । प्रायः २५ से.मी.दीर्घताविशिष्टं शिलायाम् उत्कीर्णम् एकं क्रीडाफलकं (धोलवीरतः प्राप्तम्), प्रायः ४ से.मी.दैर्घ्यविशिष्टा एका मृन्निर्मिता वंशी, (राजस्थानस्य करणपुरतः प्राप्तम्) हरप्पा-जनाः प्रौढानां बालकानां च विनोदार्थं बहूनां क्रीडानां क्रीडनकानां च निर्माणं कृतवन्तः !


## सांस्कृतिकानि प्रतीकात्मकानि च वस्तूनि





चित्रम् ६.१५-१, ६.१५-२, ६.१५-३ । प्रायः 'पुरोहितराजः' इति नाम्ना प्रसिद्धायाः आकृतेः प्रतिमा (यद्यपि एषा प्रतिमा कस्यास्ति इति न ज्ञायते); स्वस्तिकं दर्शयन्ती एका मुद्रा; उन्नतमञ्चे उपविष्टां शक्तिशालिभिः पशुभिः च परिवेष्टितां त्रिमुखधारिदेवतां चित्रयन्ती मुद्रा।





चित्रम् ६.१५-४, ६.१५-५, ६.१५-६ । 'नृत्यरता बालिका', मोहेंजोदारो-नगरतः प्राप्ता कांस्यमूर्तिः (अस्याः उच्चता प्रायः १०.८ से. मी. अस्ति); 'नमस्कारमूद्रायाम्' उपविष्टा एका मृन्मयप्रतिमा; घटस्य उपरि निर्मितम् एकं चित्रणं, यत् पात्रस्य अधोभागे जलपानार्थ सहजमार्गम् अन्विष्यमाणस्य पिपासितकाकस्य कथां कथयति इति भासते।
(लोथल्-इत्यस्मात् स्थानात् प्राप्तम्)

© NCERT not to be republished

## विषयेऽस्मिन् चिन्तयन्तु

◈ १०१ तथा १०२ इत्येतयोः पत्रयोः वस्तूनि दृष्ट्वा – अथवा अस्मिन् अध्याये चित्रितानि अन्यानि वस्तूनि दृष्ट्वा - किं भवन्तः चिन्तयितुं शक्नुवन्ति यत् हरप्पावासिनां कृते काः क्रियाः, जीवनस्य के पक्षाः वा महत्त्वपूर्णाः आसन्?



## एहि, वयम् अन्विषामः

→ लोथल्-प्रदेशे यः घटः प्राप्तः आसीत्, तत्र या कथा चित्रितास्ति तां पूरयन्तु। भवतां/भवतीनां मतानुसारम् एतादृशी कथा चतुःसहस्रेभ्योऽपि (४०००) वर्षेभ्यः अधिककालं यावत् कथं रक्षिता आसीत्?

→ 'नृत्यरता बालिका' इति प्रतिमायाः विषये चिन्तयन्तु। मूर्तिना अभिव्यक्तस्य भावस्य विषये भवतां किं मतमस्ति? तस्याः सम्पूर्णं भुजं आच्छाद्यमानानि वलयानि पश्यन्तु। आभूषणधारणस्य एषा पद्धतिः गुजरातस्य राजस्थानस्य च केषुचित् भागेषु अद्यापि दृश्यते। अस्मिन् अध्याये अन्यत्र कुत्र भवन्तः एतादृशरीत्या धृतानि वलयानि द्रष्टुं शक्नुवन्ति। अनेन वयं किं निष्कर्षं कर्तुं शक्नुमः?

## समाप्तिः, नूतनतया आरम्भो वा ?

सर्वाणि आधुनिककौशलानि विकसन्ति अपि प्रायः ख्रीष्टपूर्वे ऊनविंशतिशततमे (१९००) वर्षे एतस्याः सिन्धु-सरस्वती-सभ्यतायाः क्षयः आरभ्यते। तस्याः निवासिभिः एकैकशः नगराणि परित्यक्तानि सन्ति। अवशिष्टाः केचन निवासिनः परिवर्तितवातावरणे ग्राम्यजीवनशैलीं स्वीकृतवन्तः - पूर्वसर्वकारः प्रशासनं वा तदा नासीत् इति भासते। क्रमेण हरप्पा-जनाः शतसंख्यायां, सहस्रसंख्यायां वा लघुग्रामीणक्षेत्रेषु अभिप्रस्तृताः अभवन् ।

## विषयेऽस्मिन् चिन्तयन्तु

ग्रामजीवने नगरजीवनापेक्षया अन्नजलयोः सुलभता आसीत् इति कारणेन हरप्पा-जनाः ग्रामीणजीवने प्रत्यागतवन्तः। तत्कालेऽपि इदानीम् इव नगराणि अन्नानां कृते, कदाचित् जलस्य कृते च ग्रामेषु आश्रितानि आसन्।

एतदपि अनुमीयते यत् बहिराक्रमणैः अस्य नगराणां विनाशः अभवत्। परन्तु कस्यापि युद्धस्य आक्रमणस्य वा चिह्नं तत्र न प्राप्यते । वस्तुतः, हरप्पा-जनाः किमपि सैन्यदलम्

© NCERT not to be republished

युद्धस्य कृते शस्त्राणि वा न रक्षितवन्तः इति भासते। यावत् प्रमाणम् उपलभ्यते, तस्याधारेण एषा शान्तिपूर्णसभ्यता आसीत् इति भासते।

साम्प्रतं तत्र कारणद्वयमनुमीयते। प्रथममस्ति, जलवायोः परिवर्तनं, येन ख्रीष्टपूर्वात् द्विविंशतिशततमात् (२२००) वर्षादारभ्य अग्रे विश्वस्य अधिकांशभागः प्रभावितः अभवत्। तेन न्यूनवृष्टिः अभवत्, शुष्ककालश्च आगतः। कृषिकार्यं दुष्करं अभवत्। नगरेषु आहारस्य आपूर्तिः अपि न्यूनीभवति स्म। द्वितीयमस्ति, सरस्वती-नदी। तस्य मध्य-तटप्रदेशः शुष्कः जातः। तेन कारणेन कालीबङ्गानः बनवाली इत्यादीनि नगराणि अकस्मात् परित्यक्तानि अभवन्। एते द्वे कारणे विहाय अन्यानि कारणानि अपि भवितुम् अर्हन्ति स्म परन्तु एतद् घटनाद्वयम् अस्मान् स्मारयति यत् अस्माकं कल्याणस्य कृते वयं जलवायोः पर्यावरणस्य चोपरि किदृशाः आश्रिताः स्मः।

यद्यपि तस्य नगराणि लुप्तानि, तथापि हरप्पा-सभ्यतायाः संस्कृतिः, तेषाम् उन्नतकौशलानि इदानीमपि जीवन्ति तथा च तानि भारतीयसभ्यतायाः अग्रिमं चरणं प्रति प्रसारितानि भवन्ति। अग्रिमे अध्याये वयं तस्य अन्वेषणं करिष्यामः।

## अग्रे गमनात् प्राक् ...



- सिन्धु-सभ्यता, हरप्पा-सभ्यता सिन्धु-सरस्वती-सभ्यता वा विश्वस्य प्राचीनतमसभ्यतासु अन्यतमा अस्ति । अस्य निवासिनः नाम हरप्पाजनाः सुपरिकल्पितानि नगराणि निर्माय तत्र कुशलजलप्रबन्धनं, विविधशिल्पं, प्रसारितवाणिज्यम् इत्यादिकं सम्पादयन्ति।
- उन्नतकृषिकर्मेण नगरेषु विविधशस्यानाम् उत्पादनम् अभवत्।
- सम्भवतः जलवायौ एवञ्च प्रकृतौ परिवर्तनानां कारणेन एषा सभ्यता क्रमशः क्षयं प्राप्ता। जनाः ग्राम्यजीवनं प्रत्यागतवन्तः।

© NCERT not to be republished

## प्रश्नाः, क्रियाकलापाः परियोजनाश्च

१. अस्मिन् अध्याये पठितानां सभ्यतानां किमर्थं अनेकानि नामानि सन्ति ? तेषां महत्त्वविषये चर्चयन्तु।

२. सिन्धु-सरस्वती-सभ्यतायाः कासाञ्चन उपलब्धीनां सारांशं कृत्वा संक्षिप्तं प्रतिवेदनं सार्धशतात् द्विशतेषु (१५० तः २००) लिखन्तु।

३. कल्पयन्तु यद् भवद्भिः हरप्पा-नगरात् कालीबङ्गानं प्रति गन्तव्यम् अस्ति । भवतां समीपे के भिन्नाः विकल्पाः सन्ति ? तत्र प्रत्येकेन मार्गेण भवन्तः कतिसमयाभ्यन्तरे तत्स्थानं प्राप्तुं शक्नुवन्ति इति अनुमातुं शक्यते वा?

४. कल्पयामः यत् हरप्पासभ्यतायाः कश्चन पुरुषः महिला वा अद्यतनीयस्य भारतस्य आधुनिकायां रन्धनशालायाम् आनीतः आनीता वा। तत्र तेषां कृते प्रतीक्षमाणाः चत्वारः पञ्च वा बृहत्तमाः आश्चर्याः के भवितुम् अर्हन्ति?

५. अस्य अध्यायस्य सर्वाणि चित्राणि पश्यन्तु तथा एकविंशशतकेऽपि तत्रत्यानाम् अस्माकं परिचितानाम् आभूषणानाम् / इङ्गितानां / वस्तुनां वा सूचीं कुर्वन्तु।

६. धोलावीरः इत्यत्र जलाशयव्यवस्था किं दर्शयति ?

७. मोहेन्जो-दारो-नगरे इष्टकैः निर्मिताः प्रायः सप्तशतं (७००) कूपाः प्राप्ताः भवन्ति। अनेकां शताब्दीं यावत् तेषां नियमितरूपेण रक्षणावेक्षणम् उपयोगश्चाभवत् इति दृश्यते। तेषाम् उपयोगानां विषये चर्चयन्तु।

८. हरप्पासभ्यतायाः विषये प्रायः एतत् कथ्यते यत् तस्य निवासीनां मध्ये उच्च-नागरिक-भावना आसीत्। अस्य कथनस्य यथार्थताविषये चर्चां कुर्वन्तु। किं भवन्तः सहमताः सन्ति ? अद्यत्वे भारतस्य कस्यापि महानगरस्य नागरिकैः सह तुलयन्तु।

© NCERT not to be republished